# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् – २०१६

कक्षा- आचार्यः - १ (Sem – 2) **प्रश्नपत्रम् - ३** गुणाः - ७०

विषयः - नव्यव्याकरणम् **कोड - CC 4.2.5** समयः- ११:०० तः २:००

दिनाङ्कः - सन्दर्भग्रन्थः - परमलघुमञ्जूषा, लघुशब्देन्दुशेखरः

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः १ द्वयोः एकं वाक्यं ग्रन्थदिशा व्याख्येयम्** (४)

(अ) संस्कारकल्पिका वृत्तिस्मृतिरेव शाब्दबुद्धिरेव वेति अन्यतेदत्

(आ) एष वन्ध्यासुतो याति खपुष्पकृतशेखरः।
कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः॥ इत्येतत् व्याख्येयम्

**प्रश्नः २ द्वयोः किमपि एकम् उत्तरयत** (१२)

(क) वैयाकरणसिद्धान्तलघुमञ्जूषायाः मङ्गलाचरणं व्याख्येयम्

(ख) शाब्दबोधरूपकार्यस्य कारणं विवेचयत।

**प्रश्नः ३ त्रिषु द्वयोः उत्तरे देये** (४)

(क) नैयायिकानां मते शक्तिस्वरूपं विवेचयत

(ख) वैयाकरणमते ईश्वरेच्छायाः शक्तित्वेन स्वीकारः किमर्थः न शक्यः?

(ग) 'स्वार्थसंवलितपरार्थाभिधायिका' इयं परिभाषा कस्याः लक्षणायाः वर्तते?

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः ४ द्वयोः एकस्य उत्तरं लेख्यम्** (४)

(अ) आकाङ्क्षायां स्वरूपं विवेचयत।

(आ) शाब्दबोधसहकारिकारणानि कानि?

**प्रश्नः ५ द्वयोः कस्याप्येकस्य भाष्यदिशा व्याख्यानं कार्यम्** (१२)

(क) स्फोटस्य स्वरूपं ग्रन्थोक्तदिशा विवेचयत।

(ख) वृत्याश्रयः शब्दः कः? तद्विषये नैयायिकमतं किम्?

**प्रश्नः ६ त्रिषु द्वयोः उत्तरं लेख्यम्** (४)

(क) 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च' इत्येषा पङ्क्तिः

विवेचनीया

(ख) ‘अनादिनिधनं ब्रह्म... इत्यादिकारिकां विवेचयत।

(ग) पदे वर्णा न विद्यन्ते.. इत्यादिकारिकां विवेचयत।

तृतीयान्वितिः (युनिट - ३)

प्रश्नः ७ **द्वयोः एकस्य शेखरदिशा व्याख्यानं विधेयम्** (४)

(अ) सरूपाणामेकशेष एकविभक्तौ

(आ) ङ्याप्प्रातिपदिकात्

प्रश्नः ८ **द्वयोः एकस्य शेखरदिशा व्याख्यानं विधेयम्** (८)

(क) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्।

(ख) यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्।

प्रश्नः ९ **पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि** (३)

(क) ‘ङसिङ्योः स्मात्स्मिनौ’ इत्येतत् सूत्रं किं करोति?

(ख) ’सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य’ इत्येतस्याः परिभाषायाः कोऽर्थः?

(ग) ‘ङेर्यः’ इत्येतत् सूत्रं किं करोति?

(घ) ‘नामि’ इत्येतत् सूत्रं किं करोति?

(ङ) ‘सर्वादीनि’ इत्यत्र कीदृशः बहुव्रीहिः समासः उच्यते?

चतुर्थी अन्वितिः (युनिट – ४)

प्रश्नः १० **द्वयोः कस्याप्येकस्य सूत्रस्य शेखरदिशा व्याख्या कार्या** (४)

(क) आमि सर्वनाम्नः सुट् (ख) जराया जरसन्यतरस्याम्

प्रश्नः ११ **द्वयोः कस्याप्येकस्य सूत्रस्य शेखरदिशा व्याख्या विधेया** (८)

(क) पद्दन्नो..इति सूत्रं प्रपूर्य सोदाहरणं व्याख्या विधेया

(ख) यचि भम्

प्रश्नः १२ **पञ्चसु केषामपि त्रयाणाम् उत्तराणि लेख्यानि** (३)

(क) ‘आकडाअरादेका संज्ञा’ इत्येतत् षट्प्रकारकसूत्रेषु कीदृशं सूत्रम्?

(ख) ‘आटश्च’ इत्येतत् सूत्रं किं करोति?

(ग) ‘जसि च’ इत्येतत् सूत्रं किं करोति?

(घ) सम्बुद्धौ ह्रस्वस्य गुणः केन सूत्रेण विधीयते?

(ङ) घि-संज्ञाविधायकं सूत्रं किम्?